योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ४०

चत्वारिंशः सर्गः ४०

श्रीभगवानुवाच ।

स्थैर्यं देहस्य दृष्टस्य जीवितं प्रोच्यते जनैः ।

देहान्तरार्थं देहस्य संत्यागो मरणं स्मृतम् ।। १

द्वाभ्यां चैवासि पक्षाभ्यामाभ्यां मुक्तो महामते ।

किं ते मरणमस्तीह किं वा जीवितमस्ति ते ।। २

निदर्शनार्थमेतत्तु मयोक्तमरिमर्दन ।

न त्वं जीवसि सर्वज्ञ म्रियसे न कदाचन ।। ३

देहसंस्थोऽप्यदेहत्वाददेहोऽसि विदेहदृक् ।

व्योमसंस्थोऽप्यसक्तत्वादव्योमेव हि मारुतः ।। ४

स्पर्शसंबोधकारित्वाद्देह एवास्ति सुव्रत ।

उत्सेधारोधकत्वेन खमुत्सेधस्य कारणम् ।। ५

प्रबुद्धो ज्ञातवस्तुत्वाद्देहः क्व शमिनामिह ।

इदं त्वेकं परिच्छिन्नं रूपमज्ञेषु दुःस्थितम् ।। ६

सर्वदा सर्वमेवासि चित्प्रकाशः परैकधीः ।

को देहः कोऽप्यदेहस्ते यं गृह्णासि जहासि च ।। ७

समुदेतु वसन्तो वा वातु वा प्रलयानिलः ।

भावाभावविहीनस्य किमभ्यागतमात्मनः ।। ८

प्रलुठत्स्वपि शैलेषु कल्पाग्निषु दहत्स्वपि ।

वहत्सूत्पातवातेषु स्वात्मन्येव हि तिष्ठति ।। ९

सर्वभूतानि तिष्ठन्तु सर्वमेव प्रयातु वा ।

नश्यन्तु वाथ वर्धन्तामात्मन्येवाभितिष्ठति ।। १०

क्षीयते न क्षयं प्राप्ते वर्धमाने न वर्धते ।

न स्पन्दते स्पन्दमाने देहेऽस्मिन्परमेश्वरः ।। ११

देहस्याहमहं देहीति क्षीणे चित्तविभ्रमे ।

त्यजामि न त्यजामीति किं मुधा कलनोदिता ।। १२

इदं कृत्वा करोमीदमिदं त्यक्त्वेदमित्यलम् ।

इति तत्त्वविदां तात संकल्पाः संक्षयं गताः ।। २३

प्रबुद्धाः सर्वकर्तारः करिष्यन्तीह किंचन ।

न तस्याकरणे नित्यमकर्तृत्वपदं गताः ।। १४

अकर्तृत्वादभोक्तृत्वमर्थादेव समागतम् ।

संगृहीतं किलानुप्तं केनेह भुवनत्रये ।। १५

शान्ते कर्तृत्वभोक्तृत्वे शान्तिरेवेह शिष्यते ।

प्रौढिमभ्यागता सैव मुक्तिरित्युच्यते बुधैः ।। १६

प्रबुद्धाश्चिन्मयाः शुद्धाः सर्वमाक्रम्य संस्थिताः ।

किं त्यक्तं परिगृह्णन्तु किं गृहीतं त्यजन्तु वा ।। १७

ग्राह्यग्राहकसंबन्धप्रमितावयविक्रमैः ।

हीनः प्रमेयावयवैः किं गृह्णातु जहातु किम् ।। १८

ग्राह्यग्राहकसंबन्धे क्षीणे शान्तिरुदेत्यलम् ।

स्थितिमभ्यागता शान्तिर्मोक्षनाम्नाभिधीयते ।। १९

तत्र स्थिताः सदा शान्तास्त्वादृशाः पुरुषोत्तमाः ।

सुषुप्तावयवस्पन्दसाधर्म्येण चरन्ति हि ।। २०

परावबोधविश्रान्तवासनो जगति स्थितिम् । ।

अर्धसुप्त इवेहेमां त्वं पश्यात्मस्थया धिया ।। २१

न रमन्ते हि रम्येषु स्वात्मन्येव गताशयाः । ।

नोद्विजन्तेऽन्यदुःखेषु स्वात्मन्येकरसायनाः ।। २२

नित्यप्रबुद्धा गृह्णन्ति कार्याणीमान्यसङ्गिनः ।

मुकुरा इव बिम्बानि यथाप्राप्तान्यवाञ्छया ।। २३ ।

जाग्रति स्वात्मनि स्वस्थाः सुप्ताः संसारसंस्थितौ ।

बालवत्प्रविवेपन्ते सुषुप्तसदृशाशयाः ।। २४

त्वमजितपदवीमुपागतोऽन्तः

कमलजवासरमेकमेव भुक्त्वा ।

गुणगणकलितामिहैव लक्ष्मीं

व्रज परमास्पदमच्युतं महात्मन् ।। २५

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मोक्षोपायेषूपशमप्रकरणे प्रह्लादबोधनं नाम चत्वारिंशः सर्गः ।। ४० ।।